"करवीरं भृङ्गराजं लवणं कुष्ठमर्द्दकम् ।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेच्च तत् ।
पामां विचर्च्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै" ॥
"सैन्धवञ्च विडङ्गानि सोमराजी तु सर्षपाः ।
रजनी द्वे विषाश्चैव गोमूत्रेण च पेषयेत् ।
कुष्ठनाशश्च तल्लेपान्निम्बपत्रादनात्तथा" ॥
इति च गारुड़े १८७ अध्यायः ॥
"सतक्रकाशमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै कुष्ठरोगनुत्" ॥
इति गारुड़े १८८ अध्यायः ॥
"पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
सार्द्धं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ॥
शिखायाश्चैव तद्बद्धं भवेदैकाहिकादिनुत् ।
एतत् सकाञ्जिकं पीतं वातकुष्ठज्वरादिनुत्" ॥
इति गारुड़े १९२ अध्यायः ॥
"नित्यं निम्बदलानाञ्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ॥
हरीतकी विडङ्गञ्च हरिद्रा सितसर्षपाः ।
सोमराजस्य वीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च" ॥
वीजानि स्थाने मूलानि वा पाठः ।
इति तत्रैव १९४ अध्यायः ॥
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकक्कोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुश्चीरकस्तूर्य्यः कुष्ठं तगरमालिका ।
गोरोचना प्रियङ्गुश्च वोलं मदनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्च्चूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम् ।
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम्" ॥
इति गारुड़े १९८ अध्यायः ॥ * ॥
अथ वैद्यकमते कुष्ठचिकित्सामाह ।
"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ॥
पुराणधान्यानि च जाङ्गलानि
मांसानि मुद्गाश्च पटोलयुक्ताः ।
यवादयश्चात्र हिताः पुराणा
घृतानि शाकानि च तिक्तकानि" ॥
तन्त्रान्तरे ।
"पुराणाः शालिगोधूममुद्गाद्याः कुष्ठिनो हिताः ।
तिक्तशाकं जाङ्गलञ्च पानादौ खदिरोदकम् ॥
ये लेपाः कुष्ठानां युज्यन्ते निर्गतास्रदोषाणाम् ।
संशोधिताशयानां सद्यः सिद्धिर्भवेत्तेषाम् ॥
दूर्व्वाऽभयासैन्धवचक्रमर्द्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः ।
एभिः प्रलेपैरपि बद्धमूलां
कण्डूश्च दद्रुश्च निवारयन्ति ॥
तुल्यो रसः शालतरोस्तुषेण
सचक्रमर्दोऽप्यभयाविमिश्रः ।
पानीयभुक्तेन तदम्लपिष्टो
लेपः कृतो दद्रुगजेन्द्रसिंहः ॥
विड़ङ्गैड़गजाकुष्ठनिशासिन्धूत्थसर्षपैः ।
धान्याम्लपिष्टैर्लेपोऽयं दद्रुकुष्ठविनाशनः ॥

एड़गजकुष्ठसैन्धवसौवीरसर्षपैः क्रिमिघ्नैः ।
क्रिमिसिध्मदद्रुमण्डलकुष्ठानां नाशनो लेपः ॥
पर्णानि पिष्ट्वा चतुरङ्गुलस्य
तक्रेण पर्णान्यथ काकमाच्याः ।
तैलाक्तगात्रस्य नरस्य कुष्ठा-
न्युद्वर्त्तयेदश्वहनच्छदैश्च ॥ ५ ॥
विड़ङ्गसैन्धवशिवाशशिरेखा-
सर्षपकरञ्जरजनीभिश्च ।
गोजलपिष्टो लेपः
कुष्ठहरो दिवसनाथसमः ॥ ६ ॥
कासमर्द्दकमूलञ्च काञ्जिकेन प्रपेषितम् ।
दद्रुकिट्टिमकुष्ठानि जयेदेतत्प्रलेपनात् ॥ ७ ॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत् ।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥ ८ ॥
चक्राह्वयं स्नुहीक्षीरं भावितं मूत्रसंयुतम् ।
रवितप्तं हि किञ्चित्तु लेपनं किट्टिमापहम् ॥ ९ ॥
शिखरीरसेन सुपिष्टं मूलकवीजं प्रलेपतः सिध्म ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति॥१०॥
॥ ११ ॥
सक्षारं गन्धकं लेपात् कटुतैलेन सिध्मजित् ॥
कासमर्द्दकवीजानि मूलकानां तथैव च ॥१२॥१३॥
गन्धाश्मचूर्णमिश्राणि सिध्मनां परमौषधम् ॥
उपदेशात् काञ्जिकपिष्टैर्लेपः ॥ १४ ॥
गन्धपाषाणचूर्णेन यवक्षारेण लेपितम् ।
सिध्मनाशं व्रजत्याशु कटुतैलयुतेन च ॥
द्वयं समं कटुतैलेन लेपः ॥ १५ ॥
कुष्ठं मूलकवीजं प्रियङ्गवः सर्षपास्तथा रजनी ।
एतत् केशरषष्ठं निहन्ति बहुवार्षिकं सिध्म॥१६॥
नीलकुरण्टकपत्रैरालिप्य गात्रमतिबहुशः ।
लिम्पेन्मूलकवीजैः पिष्टैस्तक्रेण सिध्मनाशाय ॥१७॥
एड़गजातिलसर्षपकुष्ठं मागधिकालवणत्रयमम्लु ।
पूतिहृतं दिवसत्रयमेतद्धन्ति विचर्च्चिकदद्रुककुष्ठम्
॥ १८ ॥
सिन्दूरमरिचचूर्णं महिषीनवनीतसंयुतं बहुशः ।
लेपान्निहन्ति पामां तैलं करवीरसिद्धं वा ॥१९॥२०॥
पारदं शुद्धगन्धञ्च शिलाचोत्तरवारुणी ।
प्रपुन्नाड़श्च सर्पाक्षिमेघनादामिलाङ्गली ।
उत्तरवारुणी, राखालशशा इति ख्याता ॥
भल्लातं स्वहधूमञ्च मुनिगुञ्जा स्नुहीपयः ।
अरिष्टञ्च गुड़ः क्षौद्रं वागुजीवीजतुल्यकम् ॥
गोमूत्रैरारनालैर्व्वा पिष्ट्वा लेपञ्च कारयेत् ।
दद्रुमण्डलकण्डूश्च विचर्च्चिञ्च विनाशयेत् ॥ २१ ॥
मनःशिलाले मरिचञ्च तैल-
मार्कं पयः कुष्ठहरः प्रलेपः ॥ २२ ॥
विषवरुणहरिद्राचित्रकागारधूम-
मगलमरिचदूर्व्वाक्षीरमर्कस्नुहीभ्याम् ।
दहति पतितमात्रात् कुष्ठजातीरशेषाः ।
कुलिशमिव सरोषाच्छक्रहस्तादिमुक्तम् ॥
अत्र अनलं भल्लातकः ॥ २३ ॥
भल्लातका द्वीपि सुधार्कमूलं
गुञ्जाफलत्र्यूषणशङ्खचूर्णम् ।
तुल्यं सकुष्ठं लवणानि पञ्च

क्षारद्वयं लाङ्गलिकाश्च पक्का ।
स्नुह्यर्कदुग्धं घनमायसस्थं
शलाकया तद्विदधीत लेपम् ।
कुष्ठे किलासे तिलकालके च
अशेषदुर्नामसचर्म्मकीले ॥
भल्लातका द्वीपि चित्रकं तन्मूलम् ॥
एषां समभागचूर्णं सिजार्कयोः क्षीरे दत्त्वा किञ्चित् पाकं कुर्य्यात् । अथ वा क्षीरद्वयं चतुर्गुणं चूर्णं पादिकं लेपयोग्यं पाकं कुर्य्यात् । शलाकया कुष्ठस्थाने दद्यात् ॥ २४ ॥
"स्नुक्काण्डसुषिरे दग्ध्वा स्वहधूमं ससैन्धवम् ।
अन्तर्धूमं तैलयुक्तं लेपाद्धन्ति विचर्च्चिकाम्" ॥
सिजनलके सैन्धवस्वहधूमं समभागं प्रपूर्य्य स्थाल्यभ्यन्तरे कृत्वा शरावेण पिधाय दग्ध्वा पिष्ट्वा कटुतैलेन लेपः ॥ २५ ॥
"स्नुक्काण्डे सर्षपात् कल्कः कुकूलानलपाचितः ।
लेपाद्विचर्च्चिकां हन्ति रागवेग इव त्रपाम्" ॥
सिजनलके राइकल्कं प्रपूर्य्य शुष्कगोमयाग्नौ दग्ध्वा कटुतैलेन लेपः ॥ २६ ॥
"नारिकेलोदरे न्यस्तस्तण्डुलः पूतितां गतः ।
लेपाद्विपादिकां हन्ति चिरकालानुबन्धिनीम् ॥२७
तिलकुसुमलवणगोजलकटुतैलं लौहभाजने कृत्वा ।
शोषितमर्कमयूखैः पादस्फुटनं निहन्ति लेपेन"॥२८
"उन्मत्तकस्य वीजेन माणकक्षारवारिणा ।
कटुतैलं विपक्तव्यं शीघ्रं हन्ति विपादिकाम्" ॥
कटुतैल शं ४ माणनालपत्राणां क्षार पल ६४ जल शं ६४ शेष शं १६ कल्क धुस्तूरवीज पल ८ । उन्मत्ततैलम् ॥ २९ ॥
"अवल्गुजं कासमर्द्दं चक्रमर्द्दं निशायुगम् ।
माणिमन्थञ्च तुल्यांशं मस्तुकाञ्जिकपेषितम् ॥
कण्डूं कच्छूं जयत्युग्रां सिद्ध एष प्रयोगराट् ॥३०॥
कोमलसिंहास्यदलं सनिशं सुरभीजलेन पिष्टम् ।
दिवसत्रयेण नियतं क्षपयति कच्छूं विलेपनतः॥३१
"वायस्येड़गजाकुष्ठकृष्णाभिर्गुड़िका कृता ।
वस्तमूत्रेण संपिष्ट्वा लेपाच्छ्वित्रविनाशिनी" ॥
समभागचूर्णं छागमूत्रेण पिष्ट्वा गुड़िका कार्य्या ।
तेनैव लेपः ॥ ३२ ॥
"पूतिकार्कस्नुक्नरेन्द्रद्रुमाणां
मूत्रैः पिष्ट्वा पल्लवाः सौमनाश्च ।
लेपाच्छ्वित्रं घ्नन्ति दद्रुव्रणांश्च
कुष्ठान्यर्शांस्यननाड़ीव्रणांश्च" ॥
सौमना जातीपत्री । सर्व्वेषां पल्लवान् गोमूत्रेण पिष्ट्वा लेपो देयः ॥ ३३ ॥
"गजचित्रव्याघ्रचर्म्ममसीतैलविलेपनात् ।
श्वित्रं नाशं व्रजेत् किं वा पूतिकीटविलेपनात्" ॥
गजचर्म्म चित्ररोमव्याघ्रचर्म्म अनयोर्भस्म कटुतैलञ्च लेपः । अथवा पादुड़ियाकीटं पिष्ट्वा लेपः ॥ ३४ ॥ ३५ ॥ "कुड़वोऽवल्गुजवीजात् हरिताल-चतुर्थभागसंमिश्रः । गवां मूत्रेण पिष्टः सवर्णकरणः परं श्वित्रे" । आयुर्व्वेदसारेऽपि ।
"कुड़वो वागुजीवीजात् हरितालपलान्वितः ।
गवां मूत्रेण संपिष्य लेपनात् श्वित्रनाशनम् ॥३६॥